नं० ८६३-घ
ग्रहणादर्श: (ज्योतिषम्)
प्रबोधिनी नाम्नी टीका सहित:
पत्राणि १८ (सम्पूर्णम्)
लिपिक: बुधसिंह शर्मा
संवत् १८५६

नं० ८६२-घ

सटीकग्रहणादर्श ज्यो० १।८

॥श्रीगणेशाय नमः॥ ग्रहणादर्शव्याख्या क्रियते बुधसिंहशर्मणा वृत्तिः अथोदाहरणं ॐ नत्वेभास्यं विकेशास्यं गुरून् १ अ
यतावद्वित्थ्यापितः । येन मनरूपं मंगलं निबध्नन् ग्रंथकारो गणेशमकीर्दिग्रहान् गुरूंश्च भास्कराचार्याद्यान्वार्याभिदं गीतिसंज्ञ
कवृत्तेन प्रणमति हेरंबं नत्वादौ भास्करमुख्यान् गुरूंश्च निजपूज्यान् । ग्रंथरचनमतिलब्ध्यै ग्रहणं ज्ञातुं मयोद्यमः क्रियते १
व्याख्या हेरंबं गणेशं निजपूज्यान् स्वार्च्यान् भास्करमुख्यान् सूर्याद्यग्रहान् गुरूंश्च भास्कराचार्याद्यान् गुरून् वा नत्वा नतिं कृ
त्वा मया ग्रंथकारेणोद्यमस्तु उद्योगः क्रियते किमर्थं ग्रंथरचनमतिलब्ध्यै ग्रंथकरणबुद्धिप्राप्त्यर्थं ग्रहणं ज्ञातुं ग्रहणज्ञानाय चे
ति किं च मंगलं चाभिधेयं संबंधः सप्रयोजनं च त्वारि कथनीयानि शास्त्रे सर्वत्र धीमता अत्र नतिकथनेन मंगलमभिहितं
ग्रहाणां मध्यस्पष्टतादिरूपनिरूपणमभिधेयं वाच्यवाचकभावः संबंधोस्ति एतच्छास्त्रं वाचकं सम्यग्ग्रहमध्यमस्पष्ट
तादिस्वरूपं वाच्यं शिष्याणां ग्रहणज्ञानं प्रयोजनं अस्य ग्रंथस्य सर्वाणि छंदांसि ६० मात्रात्मिकानि गीतिसंज्ञानि संतीह १
अथाद्यकवीनां गंभीरामुक्तिं द्योतयन्नस्य ग्रंथस्यास्य ग्रंथस्याभिधाने प्रसादगुणत्वं च वृत्तेन प्रकाशयति यद्यपि बहु
पुस्तेषु ग्रहस्य संसाधनं कृतं विज्ञैः तदपि स्वल्पमतीनां ग्रहणादर्शो मया हिताय कृतः २ व्याख्या बहुषु पुस्तेषु बहुषु
पुस्तकेषु ग्रहस्य ग्रहणस्य विज्ञैर्विशेषज्ञैः संसाधनं सम्यक्साधनं यद्यपि कृतं रचितं यद्यपि कृतं रचितं तदपि तथापि स्व
ल्पमतीनामल्पमतिस्थूलबुद्धीनां सच्छिष्याणां हितायाहितार्थं मया ग्रंथकर्त्रा ग्रहणादर्शो ग्रहणदर्शाख्यो ग्रंथः कृतो रचित इति
२ अथ ग्रहणसंभवनिर्णयं सार्द्धवृत्तेनाह केतोर्वा गोः पश्चादग्रे कोल्पांतरे भवेद्यदि वा व्यग्वर्कस्य भुजांशैरिंद्र १४ ल्पैर्दे
व पर्वसंख्यो वा २ तिथिपत्रे बुद्ध्वादौ ग्रहणद्वयं संभवं क्रियां कुर्यात् । । सोदाहरणव्याख्याः केतोः शिखिनो वागोः राहोः
पश्चात्पुरो वा ऽल्पांतरे किंचिदंतरे यद्यर्को भवेत् तदा पर्वसंख्या ग्रहणस्यास्थितिरूपा विचार्या अथवा व्यग्वर्कस्य विराहु

र्कस्यैंशालोमेनू २८ नैर्भुजांशैरेवग्रहणस्यस्थितिर्ज्ञेया तावदित्येवं तिथिपत्रे पंचांगपत्रे ग्रहणद्वयस्य संभवं बुद्ध्वा ज्ञात्वाग्र
तो क्रियांसाधनतां कुर्यात् यथा शालिवाहनीयशाके १६०८ गुरुवारे फाल्गुनपूर्णिमांत २९।३७ घट्याद्यसामयिकोऽर्कः १०।
७।१९।४५ राहुः १०।२६।५।५९ राह्वर्कयोरंशांतरं ०।२।१२।४० त्वात्तस्मिन् लोग्रहणसंभवोस्ति विराहुर्कस्य भुजांशाद्यस्य २।१०।४०।श
कोशेभ्यो २८ न्यूनत्वाद्ग्रहणस्यसंभूतिरस्त्यत्र अथ ग्रहणसंभवज्ञानं पर्वमालातः दर्शांतेचैकनाड्यूनं गतं वा कश्चिद्विशेष
कं पंचभ्यः पूर्णिमांतेचेदधिकं तच्च पर्वता १ अथाहर्गणसाधनमधिमासावमसंस्कारं च चतुर्भिः श्लोकैराह शाकोंगैभांशकु
भिर्हीनोर्कघ्नो युतोगतैर्मासैः ४ चैत्रसितात् पृथगंकाग्न्याढ्या त्वकुरसद१ लब्धोनितात्सहितः दंता ३२ प्तैरधिमासैः खाग्नि२
घ्नः शुक्लयाततिथ्याढ्यः ५ सोधोहुताशराग्र सहितात्खाग्निरवशैलां ७०२ शसंयुताद्रहितः युगरसद ६४ लब्धैरवमै विधुवारा
द्यमहर्गणोजातः ६ सेकोव्येकः कार्यः कदापिवारप्रतिज्ञया सुज्ञैः यद्यधिमासः स्वल्पोऽल्पलब्धः पतितोपिवाप्यपतितश्च
७ लब्धस्तदाधिमासैः सेकैर्व्यकैस्तथावमैः साध्यः ७ एषां सोदाहरणं व्याख्या अत्र वर्त्तमानः शाकः १६०८ अंगभांशकु १
भि १६०८ हीनः संजातोगताब्दपिंडः अर्क १२ घ्नः चैत्रशुक्लादितोगतमासैः ११ युतः ११७ पृथक्स्थः ११ अंकाग्न्याढ्यः २९ जातः
४० स्वल्पकुरसद ६१ लब्धेन ० ऊनः ४० ततोदंता ३२ प्तेनाधिमासेनैकेन पृथक्स्थे ११ युते कृते सति अत्राहर्गणाः स्फीतशुद्धिनाधि
को शुद्धो भविष्यत्यतोत्र गतोधिमासस्यापतितत्वाद्गणितागतस्याधिमासस्यैकस्य त्यागात् शुद्धो हर्गणो भवत्येवातं च
पृथक्स्थः ११ खत्रि ३० घ्नः ३३० शुक्लयाततिथ्या १४ ढ्यः ३४४ द्विष्ठः ३४४ हुताग्र ३ युतः ३४७ खाग्निरवशैलां ७०२ शसंयु
तः ३४७ ततोयुगरसद ६४ लब्धैरवमैः ५ द्विष्ठः ३४४ रहितः [illegible] सन्विधुवारार्चंद्रवारादयमहर्गणोजातः ३२९ कदापिक
दाचिदपिसुज्ञैः शुद्ध हेवारप्रतिज्ञया वारपरीक्षया सेकः १ एकेनावमरूपेण सहवर्त्तमानः सेकः तथाव्येकः विगतोरहि

तणकोयस्मात्सब्येकोगणितागताहर्गणः कार्यः अत्राहर्गणश्र२९वारपरीसार्थसप्त७तष्टः३सन् चंद्रवारात्तृतीयोवुधोगतउदये
२ गुरुवारोतोऽहर्गणः स्फुटः २२९ अथचयत्रस्पष्टोधिमासः पतितः सन्नेवत्पलब्धोगणितकर्मण्यप्राप्तस्तदायत्रऽपतितोपिगणन
२ याचेल्लब्धस्तदापिक्रमेणाधिमासेः सैकेवैकैस्तदवमैश्चस्फुगणः साध्यः उक्तंचैतद्भास्करीयसिद्धांतेस्पष्टोधिमासः पतितोप्यल
ब्धोयदातदावापतितोपिलब्धः। सैकेनिरेकैः क्रमशोधिमासैस्तदादिनौघः सुधियाविधेयः १ अन्यच्च अभीष्टवारार्थमहर्गणश्चे
त्सैकोनिरेकस्त्वियथोपितद्वदितिदिनगणस्फुटिः अथरवींदुउच्चपातानाहवक्ताभ्यां रुद्रा११विंशति२०रवाग्नय२८ इभचंद्रा१८र
वेः स्मृतः क्षेपः ० रुद्रा११ अष्टाविंशति२८ रंगकरा२६ ऊनविंशति१९ लीवः चंद्रोच्चस्याभ्रं०खाजा०त्रिंशत्३०द्योमसागराः
४० क्षेपः पातस्याभ्रं० तिथ्यो२५व्धिशरा:५४कुकराः२१ग्रहादिकः क्षेपः स्पष्टार्थएते अथमध्यार्कसाधनंवक्ते
नाह इन२गुणगणाब्धदिनगणगुणखनवां२०२ शादिनागणोहीनः १ तदंशास्तु खाग्निहताभाद्यः स्वक्षे
पयुतोमध्यइनः व्याख्या इनगुणगणोद्वादशगुणोऽहर्गणस्तेनाढ्योयुक्तोहर्गण स्त[illegible]दस्मा
द्गुणखनवभि२०२र्यल्लब्धमंशादि तेनहीनोरहितोऽहर्गणोजातोंशाद्यो भागाश्च स्तुखाग्नि३०हताश्चिशद्गुणा तस्य
जिताः संतोजातोभाद्योराश्याद्यः स्वक्षेपसंयुतोनिजक्षेपेणयुक्तः सन्जातोमध्यइनोर्कः उदाहरणं इन१२गुणगणा४०६८ग
णा३२९ ढ्यः ४४०७ अस्यगुणखनवां२०२शादिना४।५२।४२ गणः ३२९ रहितः सन्जातोंशाद्यः ३२४।७।१८ भागाजवास्तुखाग्नि३०हताः
संतोभाद्योराश्याद्योजातः ११।४।७।१८ स्वक्षेपा ११।२०।२८।१८ द्योजातोमध्यमोरवीराश्याद्यः १०।२४।४५।२९ अथेंदुसाधनंव
क्तेनवृत्तेन हि२गुणगणोग७गुणः स्वात्यष्टो७शोनोलवादिकश्चंद्रः ११ गणखखरसगज८६००भागोनः स्वक्षेपेणसंयुतोर २
वित्त अस्योदाहरणमेवव्याख्या हि२गुणगणः ६७८ अग७गुणः ४७४६ स्वात्यष्टि७भागेन२७९।२०।३५ ऊनः ४४६६।४९।२५
गणस्य३२९ खखरसगज८६०० भागेन०।२।२९ रवीगतः ४४६६।४९।२५ हीनः सन्जातोंशाद्यः ४४६६।४७।४९ रविवद्राभास्तु

सू	मं	उ॰	पा
११	११	००	००
२०	२८	१०	२५
२८	२६	३०	५४
२८	२८	४०	२२

४४६६ खत्रि२०हृताः संतो जातो राश्याद्यः १४८।२६।४७।४ चक्रे १२ तष्टः ४।२६।४७।४ स्वक्षेपा २।२८।२६।१८ द्यो जातो मध्येंदुः
४।२५।१३।२२ अथ चंद्रोच्चसाधनं वृत्तेनाह गणरविखसमुद्रैः ४०१२ भाग लब्ध नवरभागान्वितोंशकाद्यो भाः १२ खत्रि२०हृताः रा
श्याद्यं स्वक्षेपाढ्यं भवेच्च चंद्रोच्चं अस्याप्युदाहरणमेव व्याख्या गणस्य २२९ रविखसमुद्रैः ४०१२ भाः ०।५।४ गणस्य ३२९ नवरभा
गेन ३७।४०।० अन्वितो जातोंशाद्यः ३७।४५।४ लवा ३७ स्तु त्रिंशा ३० द्भक्ताः संतो जातं राश्याद्यं १।७।४५।०४ स्वक्षेपा ०।१०।२०।४० द्यं
जातं चंद्रोच्चं २।१८।२५।४४ अथ पातसाधनं वृत्तेनाह गणात्खखभां ७००० शगणगोक्ष्णां १९ शायुतोंशादिकोंशका विहृताः १२
खगुणै ३० र्भाद्यो जातः स्वक्षेपेनेह संयुतः पातः अस्याप्युदाहरणमेव व्याख्या गणस्य २२९ खखखभां ७००० भाः ०।७।३२ गणस्य
२२९ गोक्ष्णां १९ शोन ७।५०।३१ युतो जातोंशाद्यः ७।५८।३ अंशास्तु खगुणै ३० र्भक्ताः संतो जातो भाद्यो राश्याद्यः ०।७।५८।३ स्वक्षे
पा ०।२५।५४।२१ द्यो जातो राश्याद्यः पातः ०।१।२।५२।२४ अथ वीजप्रशंसां वृत्तेनाह निर्वीजं वचनं यस्मान्नं

र	चं	उ	पा
२०	·४	·१	·१
२४	२५	१८	·३
४५	२२	२५	५२
२९	२२	४४	२४

साधनं मया क्रियते व्याख्या यस्मान्निर्वीजं वीजर
कस्यापि नास्ति भूमध्ये तस्मात्सवीजकर्मग्रहस्य सं
जनस्यापि मान्यं न मंतव्यं नास्ति तस्माद्धेतोः सवीजक
हितं निर्निदानं वा वचनं वा क्वं भूमध्ये भूमंडलमध्ये कस्य
र्किंग्रहाणां संसाधनं मया क्रियते अथ दृग्गणितैक्य
र्मग्रहस्य वीजकर्मसहितस्य जातित्वादेकवचनं ग्रहस्य
नगाग्ने: ७८ खाग्नि ३० भिः क्रमाद्विभ्वैः १३।२५ लब्धं रवेः कलाद्यं विकलाद्यं
कृद्वीजकर्मसाह वृत्तेनाह यातावदेभ्योऽब्धिरसै ६४ र्नागाग्नेः ७८ खाग्नि ३० भिः क्रमाद्विभ्वैः १३।२५ लब्धं रवेः कलाद्यं विकलाद्यं
क्षिजकर्मसाह वृत्तेनाह यातावदेभ्योऽब्धिरसै ६४ र्नागाग्नेः ७८ खाग्नि ३० भिः क्रमाद्विभ्वैः १३।२५ लब्धं रवेः कलाद्यं विकलाद्यं
विधुविधूच्चपातानां। तेषु क्रमतोऽस्वर्णं स्वं स्वं कार्यं तु वीजकर्मेदं १६ व्याख्या चतुःस्यापि तेभ्यो यातावदेभ्य अब्धिरसै ६४ र्ना
गाग्नै ७८ खाग्निभि ३० र्विभ्वैः १३ क्रमाल्लब्धं प्राप्तं रवेर्वीजं कलाद्यं विधुविधूच्चपातानां तु विकलाद्यं वीजं ज्ञेयं अत्र रवौ हृच्चपाते धि
र्वीजकर्मक्रमशोऽस्वर्णं स्वं स्वं कार्यं रवावस्वमृणं विधावप्यृणं चंद्रोच्चे स्वं धनं पातेपि स्वं धनं कर्तव्यं अत्राकारो दृग्गणि
ततुल्य कृद्वीजं मयाक्षेपेष्वेव दत्तं ग्रंथारंभतो यावत्प्रमाणमदवीजं तदस्मिन्ग्रंथे लिखितं अथ च केचित् भ्रांतिमंतो वीजं नांगी

ते

कुर्वीतितद्भ्रांतिनिरासायसूर्यांशेनसूर्यसिद्धांतस्योक्तं तद्देवोच्यतेयथाशास्त्रमाद्यंतदेवेदंयत्पूर्वंप्राहभास्करः युगानांपरिवर्त्तेनकाल
२ भेदोत्रकेवलः १ कालभेदोत्रकेवलइत्यस्या[illegible]यमभिप्रायः श्रीसूर्योयुगेयुगेमुनिभ्यः सूर्योपदिष्टशास्त्रंसांतरंदृष्ट्वान्निरंतरंतेभ्यःप्रो
क्तवान् तेनमुनिभिरपिस्वग्रंथेषुग्रहाणांकालवशेनांतरंदृष्ट्वातद्बीजंग्रहेषुदेयमित्युपदिष्टं उक्तंचवसिष्ठसिद्धांते इत्थंमांडव्यसं
3 क्षेपादुक्तंशास्त्रंमयोदितं विस्तरस्तीरविचंद्राद्यैर्भविष्यतियुगेयुगे १ विस्तरोक्तिर्विस्त्रंसनं शैथिल्यं विशुधर्मात्तिरेव संसाध्यस्पष्टत
रंबीजंनलिकादियंत्रेभ्यः तत्संस्कृतग्रहेभ्यःकर्त्तव्यौनिर्णयादेशौ १ अतएवार्यभटब्रह्मगुप्तादिभिःस्वस्वकाले अंतराण्युपलभ्य
मुनिकृतग्रंथोक्तिषुबीजंनिक्षिप्यग्रंथारचिताः इत्यलंकिंबहुनेह अत्रग्रंथारंभतोगताब्दानामभावादब्दबीजसंस्कारोदाहरणस्या
प्यभावः १८ अथरवींदूच्चपातानांमध्यगतीर्वृत्तेनाह गोला ५९ अष्टे ८ नस्वेंदोः खांकागाः ७९० शरागनगो ३५ द्विगतिः चंद्रोच्चस्य
रसाः ६ कुभृतयः ४१ पातस्यवह्नयो ३ रुद्राः ११। ७ व्याख्यासुगमा अथभूमध्यरेखासंज्ञांस्वदेशीयमध्यमार्थदेशांतरकर्मच
वृत्तत्रयेणाह लंकायदेवकन्याकांतीकैलाशपर्यंतीवत्सं गुल्मपुरमुज्जयिनीसुगर्गराटंकुरुक्षेत्रंस्थलंमेरुः १८ एतेकुमध्यरेखा
निजदेशमध्ययोजनकैः निघ्नास्वगतेः खभा८० प्तविकलाः प्राक्परेग्रहेऽस्वंस्वं १९ एवंकृतेरवींदुग्रहयोर्ग्यामध्यमाःस्व
देशीयाः रविविधुविधूच्चपाताश्चोदयिकाः संभवंतिगगनचराः २० व्याख्या लंकापुर्याःसूत्रस्यैकमग्रंवद्धान्यदग्रंमेरुशिरसि
धार्यमियंभूमध्यरेखातत्सूत्राधोयानिनगराणिभूमध्यरेखासंज्ञानास्यर्थः रेखादेशस्वदेशयोर्मध्यस्थप्राक्पश्चिमसंज्ञक
योजनैर्गुणिताया[illegible]ग्रहस्यमध्यमगतेःखकांशाद्याः खभा८० प्ता अशीतिलब्धाविकलास्तादेशांतरसंज्ञकाज्ञेयाः रेखातः
पूर्वदिग्भागेस्वदेशेसतिग्रहेषुदेशांतरमस्वमृणं पश्चिमभागेस्वंधनंकार्यं एवंदेशांतरसंस्कृतारवींदूच्चपाताःसूर्योदयका
लिकानिजदेशीयामध्यमाःखेचराःसंभवंति उदाहरणं कुरुक्षेत्रात्पश्चिमभागेषष्टि ६० योजनप्रमितोमुलतानदेशोस्तियो ३
जनै ६० रवेर्मध्यगतिः ५९।८ गुणिता ३५४८।० खभैः ८० भक्तास तल्लब्धं विकलात्मकंदेशांतरंरवेः ४४ एवमिंदोर्विकि० ५९३ उ

स	चं	उ	रा
५९ ८	७९० ३५	६ ४१	३ ११

वंस्य विधुपातस्य वि॰ २२ देवातः पश्चिमदेशत्वाद्देशांतरे धने कृते सति जाता देशांतरकर्मसंस्कृता रवीदृक्षपाताभ्रकेंद्रकव्याः २०
इति बुधसिंहशर्मणा विरचितायां स्वकृतग्रहणादर्शटीकायां प्रबोधिन्यां मध्यमाभासः प्रथमः १ अथ स्पष्टभासो व्याख्यायते
तावद्भुजकोटी वृत्तेनाह ऊनं भुजसंज्ञं तत्र अधिकं षड्भाच्च्युतं च षड्भोनं षड्भाधिकं नवाधिकमिनभुक्तं तु विभुजं त्रिभं को
टिः १ व्याख्या॰ वक्ष्यमाणकेंद्रं ऊनं राशित्रयादूनं सद्भुजसंज्ञं अधिकं राशित्रया[illegible]दधिकं च षड्भोनं षड्भ्यः राशिभ्य ऊनं सद्भुज
संज्ञं षड्भाधिकं राशिषट्कादधिकं च षड्भोनं षड्भ्य एवमूनं भुजसंज्ञं नवाधिकं नवराशितोधिकं तद्दिनभुक्तं द्वादशराशिभ्यः भुक्तं भुज
संज्ञं ज्ञेयं अथ त्रिभं राशित्रयं विभुजं विगतभुजं यस्मात् धृति भुजेन हीनं सा कोटिः स्यात् उदाहरणं यथाऽर्ककेंद्रं ३।२२।१२।४७ अ
धिकत्वात् षड्भोनं षड्भ्यः राशिभ्य ऊनं कृतं सद्भुजसंज्ञं २।६।४८।१२ अनेन भुजेन त्रिभमूनं संजाता कोटिः ०।२२।१२।४७ ॥१॥ अथ
गोलायनं वृत्तेनाह मेषात्तुलाच्च रसभे सूर्ये सौम्यश्च दक्षिणो गोलः नक्रात्कर्कात् षड्भे सौम्यायनदक्षिणायने अर्के २ व्याख्या॰
मेषाद्रसभे षड्भे सूर्ये सति सौम्य उत्तरो गोलः च पुनस्तुलात् षड्भेऽर्के सति दक्षिणायनो गोलो ज्ञेयः अथ नक्रान्मकराद्धा कर्कात् षड्भे
षड्राशावर्के सति क्रमेण सौम्यायनदक्षिणायने उत्तरायनं दक्षिणायनसंज्ञे स्तः सूर्य इति पदमुपलक्षणं वस्तुतस्तु सर्वके
द्रादिषु गोलायनसंज्ञा ज्ञेया अत्रार्ककेंद्रस्य ३।२२।१२।४७ मेषाद्यषड्राशिस्थत्वादुत्तरगोलस्य संज्ञा अथ चक्रादिषड्रा
शिस्थस्य दक्षिणायनसंज्ञा २ अथायनांशान् वृत्तेनाह विंशतिः २० अयनजभागा गताब्दयुक्ते कसागराः ४१ लिप्ताः बाणाः ५
बाणाः ५ विकला मासे मासे गते प्रयोक्तव्याः २ व्याख्या॰ विंशतिर्विंशतिप्रमिता अयनजभागा अयनजांशा ज्ञेयाः गताब्दयुक्ते
कसागराः गतवर्षैर्युक्ता य एकसागराः एकचत्वारिंशः ४१ ता लिप्ताः कला ज्ञेयाः चैत्रशुक्लादितो मासे मासे गते तीते सति
बाणा बाणाः पंच पंच विकला विगणय्य योगे प्रयोक्तव्याः एवं कृते सत्ययनांशकाद्या जाताः २०।४१।५७।३ अथ ज्यासाधनं

सू	च	उ	पा
१०	४	१	१
२४	स	१८	२
४६	२२	२५	५२
१२	१५	४९	२६

साईवृत्तेनाह कुकरैः खकरा २० गो ञा १९ नग चंद्रा १७ स्तिथि १५ रवि १२ र्नो ९ ह ८ षु ५ करा २ ज्याखंडान्यंशमितेः खक्षैः प्रमुक्तखंडका
निज्या ४ भोग्य माञ्छेषांशाह्दि १० न्लब्धं तद्युतं गतांकैक्ये व्याख्या॰ तावन्त्य ज्याखंडानि यस्य ज्या साध्या तस्यांशाः कार्यास्तेभ्यः
खाक्षैः १० र्नृदशभिर्यावल्लब्धं तावंति भुक्तखंडानि गतखंडानि भोग्यमाञ्छेषभोग्यखंडगुणितात्तच्छेषांशा यद्दिगुणं लब्धं दशभिराप्तं तद्भु
क्तखंडानामैक्ये युतं सज्या भवति यत्र दशभिर्भागो न लभ्यते तत्र प्रथम खंडो भोग्यः उदाहरणं अत्रार्कमंदकेंद्रं २।२२।१२।४७
भुजां २।८।४८।१२ प्रा ६८।४८।१२ ज्यासाधनं अंशमितेः ६८ खक्षा १० प्तानि गतखंडानि ६ शेषांशाद्येभ्य ८।४८।१२ भोग्य १७ खंड ९
घ्नेभ्यः १०।५५।५७ दि १० न्लब्धं १।५।३५ गत ६ खंडांकैक्ये १०४ युतं सज्या ताज्या १०५।५।३५ अथार्कस्फुटीकरणं साईवृत्तेनाह
राशिद्वयधृतिलवतः २।१८।०।० भुजोऽर्कःकेंद्रसंज्ञकं प्राक्कं ५ केंद्रभुजज्या दि १० घ्नीत्वाष्टिषु ५५० भक्ता प्रमंशकादिफलं
मेषतुलाद्ये केंद्रके स्वर्णं तत्कृतं रविःस्पष्टः ६ व्याख्या॰ अर्कोमध्यार्को राशिद्वय धृतिलवतः भुजः सन् केंद्रसंज्ञकं रविमं
दकेंद्रं ख्यं प्रोक्तं तस्य केंद्रभुजज्या भुजांशज्या दिग्घ्नी दशगुणा कार्या सा खाष्टिषुभक्ता ५५० हृता सती आप्तं लब्धं मंशकादि मंद
फलं मेषतुलाद्ये केंद्रे सति तत्फलं मध्यार्के क्रमेण स्वर्णं कृतं सद्रविः स्पष्टः स्यात् उदाहरणं॰ मध्यमरवि[illegible] २०।२९।४८।१२ रा
शिद्वयधृतिलवतः २।१८।०।० भुजो जातं रवेर्मंदकेंद्रं २।२२।१२।४७ अस्य भुजां[illegible] २।८।४८।१२ शाद्यानो ६८।४८।१२ प्राक्सा धि
ताज्या १०५।५।३५ दि १० घ्नी १०५०।५५।५० खाष्टिषु ५५० भक्ता सती लब्धं रवेरंशादि मंदफलं २।०।६ मेषादिकेंद्रत्वान्मध्यम
रवौ २०।२९।४८।१२ फलं २।०।६ धनं कार्यं जातो रविः स्पष्टः २०।२९।४८।१८ ॥ ६॥ अथेंदुस्पष्टीकरणं द्वत्तद्वयेनाह ऐनं
फलं भ २७ भक्तं लब्धं स्वर्णं विधो पुरा रविवत् चंद्रोऽग्न्यंकफलांकित मध्यम चंद्रो विधु ६ ह केंद्रं ७ केंद्रभुजज्या दि १० घ्नी भा
ग्निकरैः २३९ भाजितांशकादिफलं मेषतुलादिकके[illegible]द्रे स्वर्णं तत्कृतं विधुः स्पष्टः ८ व्याख्या॰ इनस्येदमैनं रविसंबंधि
मंदफलं भक्तं भैः सप्तविंशत्या भक्तं सल्लब्धं भांशफलमंशाद्यं रविवद्रविमंदफलवत् पुरा प्राग्विधोः स्वर्णं धनर्णं कार्यं मेषतु

१	२	३	४	५	६	७	८	९
२१	२०	१९	१७	१५	१२	९	५	२
२१	४१	६०	७७	९२	१०४	११३	११८	१२०

लाघेऽकके केंद्रेसति विधोमध्ये दोर्भांशैः क्रमेण धनर्णं कार्यमित्यर्थः अथ भफलांकितमध्यमचंद्रो भांशफलसंस्कृतमध्येंदुश्चंद्रोच्चो
नयुक्तः सन् चंद्रकेंद्रं भवति तस्येंदुकेंद्रस्य भुजज्या भुजांशजादिग्घ्नी कार्या सा चेभाग्निकरैर्भाजिता सती लब्धं विधोः शशांकमंदफलं मे
षतुलाद्येकेंद्रे सति तन्नभरफलं भांशफलसंस्कृते दोःक्रमतः स्वर्णंकृतं सत् चंद्रस्य स्पष्टः स्यात् उदाहरणं अत्रेनं फलं २।०।६ मेत्र्यर्भक्तं स
लब्धं भांशफलमंशाद्यं ०।८।३७ इदं मध्यमचंद्रमध्ये दोः ४।२५।२२।२५ धनं कृतं सत् जातो भांशफलसंस्कृतेंदुः ४।२५।३१।४२ अथ मेवेंदू
च्चात् २।२८।२५।४९ युक्तः सन् जातमिंदुकेंद्रं ८।२२।४८।७ अस्य भुजांशाः २।२२।४८।७ भांशाः ८२।४८।७ ज्या ११।२२।३७ दिग्घ्नी ११८।५।२६।१०
इभाग्निकरैः ३२८ भाजिता सती लब्धमिंदु मंदफलमंशादि ४।५०।५२ विधोस्तुलादिकेंद्रत्वात् भांशफलसंस्कृतेंदौ ४।२५।३७
४२ मंदफलमृणं सत् जातः स्पष्टेंदुः ४।२०।२८।४९ ॥ ८ ॥ अथ रवींद्वोः स्पष्टगतिसाधनं वृत्तेनाह फलकर्मभोग्यखंडं नवलभक्तं
गतिफलं गतौ स्वर्णं केंद्रे कर्कमृगाद्ये चांद्रं विधुः २२ घ्नमब्धि ४ भिर्भक्तं व्याख्या फलकर्मभोग्यखंडं मंदफलसाधने यद्भोग्य
खंडं तन्नवभक्तं सत् यत्लब्धं तद्रविगते मंदफलं कलाद्यं अथ च चांद्रं चंद्रसंबंधि यद्भोग्यखंडं ताद्विश्व १३ गुणं कृत्वाब्धि
भिश्चतुर्भिर्भक्तं सत् लब्धं तदिंदोर्गतेर्मंदफलं कलाद्यं कर्कमृगाद्ये केंद्रे सति क्रमेण रवींदु मध्यगताविदं फलद्वयं स्वर्णं धन
र्णं कृतं सद्रवींद्वोः स्पष्टेगती स्यातां उदाहरणं रविमंदफलकर्मणि जीवाया भोग्यखंडं नव ९ र्भक्तं लब्धं रविगतेर्मंदफलं नवल
कलादि ०।१।०० कर्कादिकेंद्रत्वात् मध्यमार्कगतौ ५९।८ फलं धनं कृतं सत् जातो रवेः स्पष्टगतिः ६०।८ अथ चंद्रमंदफलकर्म
णि जीवाया भोग्यखंडं २ विश्व १३ घ्नं २६ अब्धि ४ भिर्भक्तं सत् लब्धं चंद्रगतेर्मंदफलं कलादि ६।३० कर्कादिकेंद्रत्वात् मध्येंदु
गतौ ७९०।३५ फलं धनं कार्यं जाता चंद्रस्पष्टागतिः ७९७।५ ॥ ९ ॥ अथोदयांतरकर्मसाधनं वृत्तद्वयेनाह विषमं समं पदं मे
स्त्रिभिस्त्रिभिः कलानीयमिह वर्यैः सायनमध्यार्कस्याहि २ घ्नस्य भुजमुक्ता हि धाम्न्या व्या १९ इषुपभक्ते कान्तिर्हृता ल २१
ब्धं विकलादिकं कलाद्यंयत् जोजे समे पदे स्वं स्वं सायनस्य ऊक्तमिनद्वो १९ व्या० त्रिभिस्त्रिभिर्भैः शराशोभिर्वर्यैः अष्टम

नुजैर्विषमं समंच पदं कल्पनीयं तथाच द्वादशराशीनां पदचतुष्टयं भवति तेषां मध्ये प्रथमतृतीययोः पदयोर्विषमसंज्ञा ओजसं
५ ज्ञा च द्वितीयचतुर्थयोः समसंज्ञा युग्मसंज्ञा च अथ सायन मध्यमसूर्यस्य द्विगुणितस्य भुजज्या त्रिःस्था प्या एकत्र त्रिभिर्भक्ता पंचह
तासतीलब्धं विकलाद्यं फलं· अपरत्रैकाग्निभिः२९ भक्ता सतीलब्धं कलाद्यं फलं· सायनार्के विषमसमपदस्थे सति सूर्यचंद्रयोः क्र
मेणोदयांतर फलं ऋणं धनमुक्तं उदाहरणं मध्यार्कः ०।२४।४६।१२ अयनांशाः २०।४२।५९ युतः ११।२५।२८।१० द्वि
घ्नः २२।०।५६।२० अस्य भुजांशाः २९।३।४० घ्नानां २९।०।३।४० ज्या ५८।१२।५८ पंचभक्ता लब्धं रवेरुदयांतरं विकलात्मकं ११
तथा ज्या ५८।१२।५८ एकाग्नि २९ हृता लब्धं चंद्रस्योदयांतरं कलाद्यं २।४६ सायनार्कस्य समपदत्वात् सूर्येंद्वोरुदयांत
रे धने कृते सति जातावुदयांतरसंस्कृतौ रवींदू ०।२६।४६।३० चं ४।२०।३१।३५।।११।। अथ स्वदेशीया स्वभा ज्ञानं चर
खंडानयनं चरफलकथनं दिनरात्रिमानं चात्रिभिर्वृत्तैराह मेषार्कस्था उ मध्ये यनांशराजाहीन २ शंकुजा या भा स्वपुरे

स्व	चं
१०	०४
२६	२०
४६	३१
३०	३५
१०	३१९
८	५

सा स्त छायादिग्ध्नि१० भ८ दश१० घ्ना क्रमात्रिहताः त्वा १२ चरखंडान्यपि सायनसूर्यभुजर्क्षांक तुल्यखंडैक्यं भोग्यांकघ्ना
शाद्याप्तियुक् ३० लब्धयुतं चरसंस्कृतं १२ तिथि घटिकासु विधेयं दिनार्द्धमानं द्विगोलयोः क्रमशः व्यस्त विधेराव्रार्द्धमाने द्विगुणे
त्वहर्निशोर्माने २४ या· मेषार्के मेषार्कसंक्रमणे स्वपुरमध्ये मध्याह्ने ऽयनांशराजादिने हीनशंकुजा द्वादशां
गुलशंकुजा या भा छाया सा स्वपुरे निजदेशेऽक्षछाया ऽक्षभा भवति सा स्त छाया त्रिःस्थाप्या क्रमात् द्विगिभ दश घ्ना कार्या आद्यस्था
दशगुणा मध्यस्था ष्टगुणा अंत्यस्थापि दशगुणा कार्या इति तोंत्यस्था दशगुणा त्रिविहृता सती चरखंडानि स्युः अथ सायनसूर्यभुज
र्क्षांकतुल्य खंडैक्ये अयनांशयुतस्य स्फुटसूर्यस्य यो भुजराशिस्तत्संख्याकतुल्यचरखंडस्य यदैक्यं तस्मिन् भोग्यांकघ्नांशाद्याग्र
खंडगुणितांशादितो यत्त्रिंशल्लब्धं तदैक्ये युतं कृतं सज्जातं चरं चरफलसंज्ञं अथ गोलयोर्मेषा[illegible]तुलाद्ययोर्द्विचरफलसं ५
ज्ञं तिथि घटीषु पंचदशघटीषु क्रमशः स्व[illegible]मृणं विधेयं सौम्यगोलस्थे सायनार्के सति स्वं धनं दक्षिणगोलस्थे सायनार्के सति स्वं
कृतं सद्दिनार्द्धमानं भवति व्यस्तविधे रात्र्यर्द्धं भवति अथ सौम्यगोल दक्षिणगोलयोः क्रमेण चरं हीनं युतं कृतं सद्रात्रिमानमिति

मानेदिनार्द्धरात्र्यर्द्धमाने द्विगुणे कृते अहर्निशोर्दिनरात्र्योर्मानं भवतः उदाहरणं तावदयनांशोस्य दिनाद्यनियनं अयनांशाद्याः २०

।४२।५७ स्वद्विचत्वारिंश ४२ दंशोन ०।२९।३७ हीनाः संतो जाता न्ययनांशा दिनादीनि २०।१२।२२ एभिर्दिनैर्मेषार्कसंक्रमणतः पूर्वम

र्थाद्धसमये मुलतानदेशे द्वादशांगुलशंकोः छाया सप्तांगुलमिता भवति सा सभा ७ त्रिस्थानस्था क्रमेण दश १० वसु ८ दश १० गुणा ७०।

५६।७० अंत्या त्रिभक्ता सती जातानि चरखंडानि ७०।५६।२३ उदयांतरभुजोर्कः २०।२६।४६।२० अयनांशाद्यै २०।४२।५७ युतो ११।७

।२८।५७ अस्य भुजः ०।१२।३।१७ राशिमितभुक्त खंडैक्यं शेषांशाद्यं १२।३७।३२ भोग्यखंडेन प्रथमेन ७० गुणितं ८७६।४०।२० त्रिंशद्भक्तं

लब्धं २९ भुक्तखंडैक्ये योयुतं जातं चरफलसंज्ञं २९ अनेनार्कस्य दक्षिणगोलत्वात् पंचदशघटिका ऊनाः सत्यो जातं दिनार्द्धमानं १४

।३१ युता जातं रात्र्यर्द्धमानं १५।।२९ माने द्विगुणे दिनमानं २९।०२ रात्रिमानं ३०।५८ चेति ।।२४।। अथ चरकर्मसंस्कारं वृत्तेनाह स्फुट

खगगतिश्चरघ्नी खषट् ६० हृता प्तं चरं विलिप्ताद्यं उत्तरदक्षिणगोलस्येर्के ऽस्वं स्वं विधेयं तत ।२५ व्या० स्फुटखगगतिः स्पष्टग्रहगति

श्चरघ्नी पूर्वागतैश्चरपलैर्गुणिता खषड्भिर्हृता षष्ट्या ६० भक्ता सती आप्तं लब्धं विलिप्ताद्यं विकलाद्यं चरं चरफलं उत्तरदक्षिणगोलस्थे

सायनार्के सति क्रमेण तच्चरफलं ग्रहे ऋणं स्वं विधेयमेवं कृते चरकर्मसंस्कृता औदयिका ग्रहा भवंति उदाहरणं यदा रवेः स्पष्ट

गतिः ६०।८ पूर्वागतैश्चरपलैः २९ गुणिता १७४३।५२ षष्ट्या भक्ता लब्धं रवेश्चरफलं विकलाद्यं २९ एवं मिंदोर्विकि० २९५। पातस्य वि०

१ अत्र सायनस्य सूर्यस्य दक्षिणगोलत्वाच्चरे धने कृते सति जाताश्चरकर्मसंस्कृता औदयिकस्सूर्ये २०।२६।४६।५९ इंदु

०४।२०।२०।०० पाताः २।०२।५२।३७।।२५।। अथ तिथिसाधनं सार्द्धवृत्तेनाह रव्यूनेंदोरंशाद्य नगरव ७ भक्तास्ता गताः सिता

त्तिथयः गतमिन भुक्तगम्यं गत्यंतरभाजितास्तयोर्विकलाः ६० लब्धं गतैष्यघटिकादिकफलमुक्तं तु वर्तमानति

थेः व्या० रव्यूनेंदोरविणोनस्य हीनस्येंदोरंशद्यांशाद्यं नगरव भक्ता द्वादशहृताः संतो लब्धास्ताः सिताद्युक्लपक्षप्र

तिपत्तो गता व्यतीतास्तिथयो भवंति शेषं वर्तमानतिथेर्गतं गतसंज्ञमिदमेवेन भुक्तं द्वादशांशपः भुक्तं गम्यमेष्यसं

ज्ञं तयोर्गतैष्ययोर्विकला गत्यंतरभाजितार्वीदुगत्यंतरेण भक्ताः सत्यो लब्धं वर्तमानतिथेर्गतैष्यघटिकादि

सू	चं	पा
१०	०४	२
२६	२०	०३
४६	३८	५२
५९	००	३७
६०	५९७	०२
०८	०५	११

कफलमुक्तं उदाहरणं रविगा २०।२६।४६।५९ चंद्रः ४।२०।२९।००हीन ५।२२।५१।१ अस्यां शा ७।१६ न १२ भक्ता लब्धाः सितपक्षाः
तास्तिथयः शुक्लचतुर्दशी व्यतीता शेषं पूर्णिमाया गतसंज्ञं ५।५१।२ इदमेव नः १२ शु ६ गम्यसंज्ञकं ६।८।५९ अस्य प्रतिविकला २२१६४२
६ रवीन्दुगत्यंतरेण ७२६।५७ विकलीकृतेन ४४२७ भक्ता लब्धमुदयतः पूर्णिमानं घट्यादि २०।२६ एवमेवममतिथ्यंतकालश्चदमवमाति
थ्येस्तिथ्यंतकाले साध्येतदाज्ञिमदिनौदयिकरवीन्दुतो गतकालं साध्यं तत्पंघटीतः पातितं स्पष्टश्चेषो वमतिथ्यंतो भविष्यतीति
अथग्रहाणां तात्कालिककरणं वृत्तेनाह गतगम्यकालगुणिता गतिः खषड्भि ६०र्हता प्रमंशाद्यं ७ औदयिकखगेऽस्वंस्वंकृतं
तात्कालिको ग्रहो भवति व्या॰ ग्रहस्य गतिर्दिनभुक्तिर्गतगम्यकालगुणिता गतगम्येष्टघटीभिर्गुणिता खषड्भिर्हृता षष्ट्या भक्ता प्र
लब्धं फलमंशाद्यं तत्फलं औदयिकखगेऽस्वंस्वं ऋणं धनं कृतं सत्तात्कालिको ग्रहो भवति अयमर्थः गतफलेन रहितो गम्ये
नयुतः सन्नेवं सतात्कालिकः स्यात् उदाहरणं यथा गम्यघट्यादिभिः ३०।२२ रविगति ६०।८ गुणिता १८०६।०० षष्ट्या ६० भक्ता
लब्धेन कलादिना ३०।६ औदयिकार्कः २०।२६।४६।५९ युतः सन्नभीष्टकालिको ३०।०२ कौजातः ७०।३७।७१।५ एवं चंद्रपातौ साध्यौ
अथनतसाधनं वृत्तेनवक्ति इष्टघटीभिर्हीनं द्युरात्रखंडं नतं स्मृतं पूर्वं ॥ १८ ॥ द्युनिशोरिष्टघटीषु द्युनिशोः खंडं विहीनमपर
नतं व्याख्या॰ द्युरात्रखंडं दिनरात्रखंडं दिनार्द्धं रात्र्यर्द्धं चेष्टघटीभिर्हीनं सत पूर्वनतं॰ द्युनिशोर्दिननिशयोरिष्टघटीषु द्युनि
शोः खंडं दिनार्द्धरात्र्यर्द्धं च विहीनं सदपरनतं पश्चिमनतं स्मृतं प्रोक्तं उदाहरणं रात्रिगतेष्टघटी १० रात्र्यर्द्ध २५।२९ हीना स
तीजातं चंद्रस्य पूर्वनतं नाड्यादि १५।२९। अथ ग्रस्तोदये ग्रस्तास्ते च विशेषनतमाह वृत्ताभ्यां रात्रेः शेषघटीयुग्धुदलं
सूर्यस्य पूर्वनतमुक्तं १९ रात्रेगतनाडीयुग्द्युदलं पश्चिमनतं रवेर्ज्ञेयं दिनशेषघटीयुक्तं रात्र्यर्द्धं प्राङ्नतं भवेदिंदोः
२० सूर्योदयनाडीयुग्रात्र्यर्द्धं पश्चिमं नतं चैन्दोः अनयोरुदाहरणमेव व्याख्या॰ यथोदयतः कल्पितामांतो घट्या ६
दिः २।१५ रात्रिशेषघटीसमये ४।२० स्पर्शस्तत्र दिनार्द्ध १८।२० रात्रिशेषघटी १३० युतं जातं रवेः स्पार्शिकपूर्वनतं १९
।५८ तथा कल्पितामांतो दयतः ३।२० गतरात्रिघटीसमये २।५१ मोक्षः तत्र दिनार्द्ध ७।३७ गतरात्रिघटी २।५१ युतं जा

सू	चं	पा
९०	०४	०२
३७	३७	०३
०७	२६	५६
०५	५९	०२
६०	[illegible]	०३
०८	१५	९३

तत्र स्वे मौक्तिक पश्चिमनतं २०।१९ अथ चंद्रनतार्थं कल्पित सूर्यास्तात उदयतः २३।० दिनशेष घटी समये ३।० स्पर्शः तत्र रात्र्यर्द्ध २४।३०
दिनशेष घटी ३।० युतं जातं चंद्रस्य स्पार्शिकं पूर्वनतं ७।३० तथोदयतः कल्पित सूर्यास्तात कालः ११।५ सूर्योदयतो ४।२० मोक्षः त
त्र रात्र्यर्द्ध १५।५९ दिन घटी ४।२० युतं जातं चंद्रस्य मौक्तिक पश्चिमनतं १९।५९ अथ रवीन्द्वोः कपाल संज्ञां वृत्तद्वयेनाह पूर्वकपाले
सूर्यो रात्र्यर्द्धाद्यावदस्ति मध्याह्नं २१ पश्चिमकपाले इनः स्यात् मध्याह्नाद्दलरात्र पर्यंतं पूर्वकपाले चंद्रो मध्याह्नाद्दलरात्र पर्यंतं
२२ पश्चिमकपाले इंदू रात्र्यर्द्धाद्यावदस्ति मध्याह्नं एतयोर्व्याख्या सुगमा अथ कदाचित् पर्वंति काले रवींद्वोः समकलाभावे स
ति तत्रैव नतकर्म सार्द्धद्वय वृत्तेनाह नतरहितद्युः स्वगुणो ३ भक्ताः स्वेषुघ्नर्क्षभूमयो ७२५० विदिशा २० ॥२२॥ सूर्यहरः स्वदिग्
१० शोनो ग्लौहारः स्वहारहृत्स्वफलं । प्राक्परकपालगेर्के तन्नतफलमिनस्य ऋणं धनं कार्यं २४ इंदोः स्वमंदफल ऋणं इंदौ यो
ज्यं फलं तु पूर्वनते कथितं इतरथोभयतः फलत्रयमेति कर्म नतसंज्ञं २५ नतरहित द्युस्ति थ्यं तत्कालिक नतेन रहितैः पुन
र्नतेन गुणितैः स्वगुणोस्त्रिशताः स्वेषुघ्नर्क्षभूमयः सार्द्धशतद्वयोत्तरे कादशसहस्राणि भक्ता लब्धा विदिशो दशहीनाः संतो
जातो रविहारः स एव स्वदिग्दशोनो निजदशांशोनः सन् ग्लौहार इंदोहरिः स्यात् हरिहरावेकपर्यायौ रवींद्वोः स्वफलं स्वस्व
मंदफलं स्वहारहृत्स्वस्वहरेण हृतं सद्यल्लब्धं तन्नतफलं स्वस्वनतफलं ज्ञेयं रविनतफलं तु प्राक्पश्चिमकपालस्थेर्के सति
रवौ क्रमेण ऋणं धनं कार्यं अथेंदोः स्वमंदफले ऋणे सति इंदौ पूर्वकपालस्थे नतफलं चंद्रे धनं अर्थात् पश्चिमनते चंद्र [illegible] फ
ले ऋणे सति ऋणं इतरथा फले धने सति उभयतः प्राक्कपालस्थे चंद्रे गतिफले ऋणे सति चंद्रगते नतफलं धनमन्यथा भुक्ता
दृणमिति उदाहरणं स्वगुणाः ३ पूर्वगत चंद्र पूर्वनतेन ७।२९ हीना जातं १५।३१ नतेन ७।२९ गुणं ११२।४४ अनेन स्वेषुघ्नर्क्षभू
मयो ११२५० भक्ता लब्धांशादि ५०।२।३२ दश १० हीनो जातोर्कहरोंशादि ४०।२।३२ अयमेव स्वदशांशेन ४।०।१२ हीनो
जातश्चंद्रहरोंशाद्यः ३६।२।२० अथार्कमंदफलं २।०।६ सावयवं ७२६ सवर्णितार्कहरेण १४४२१३० भक्तं लब्धं रविनत
फलं मं प्रादि ०।२।५९ पश्चिमकपालस्थार्के इन्दौ ०।२८।४६।५९ फले धने कृते सति जातो नतकर्म संस्कृतोर्कः २।२८।४९

परकपालस्थे वा चंद्रे फलत्रयः कथितः नतफलं [illegible] संस्कार्यं प्राक्कपालस्थे ५

इतरथा मंदफले धने सति उभयतः पूर्वनते पश्चिमनते च सति फलत्रयः फलम् [illegible]

६ ५८ एवं चंद्रनतफलं ८।७ चंद्रमंदफलस्य ऋणत्वाच्चंद्रस्य पूर्वकपालत्वाच्च चंद्रे ४।२०।२८।० फले धने कृते सति जातो नतकर्मसंस्कृ
तेंदुः ४।२०।४६।७ [illegible] रविगतिनतफलेन ०।१ रविवत् संस्कृतार्कगतिः ६०।९ चंद्रगतिनतफलं ०।१० चंद्रगतिमंदफलस्य धन
७ त्वात् चंद्रस्य पूर्वकपालत्वाच्च भुक्तौ ७८७।०५ फले ऋणीकृते सति जाता नतसंस्कृतेंदुगतिः ७९६।५५।२५॥ अथ स्पष्टतरतिथिसाध
नमर्केंद्वोः समकलकरणं तात्कालिकपातकरणं च वृत्तेनाह नतकर्मसंस्कृताभ्यां रविचंद्राभ्यां स्फुटा तिथिः साध्या समतिथौ
पूर्ववत् तिथौ कृत्वा प्रसाधयेत् पातं २६ व्याख्या· अमांते रवीदू राश्यादिसमौ स्याताम् इति षड्राश्यंतरे लवादिसमौ कृत्वा तात्कालिकपा
तं प्रसाधयेदिति उदाहरणं नतकर्मसंस्कृताभ्यां रवि ०।२६।४८।५८ चंद्राभ्यां ४।२०।४६।७ ऊने दोर्लिप्तिने नोदयतास्ति
थ्यंतस्पष्टतरग्रहणमध्यकालो घट्यादिः २९।३७ एतत्कालिका २९।३७ गतगम्यकालगुणिते तादिनार्के ०।७।१९।३९ इं
दुः ४।३७।१९।३९ पातः ०।०३।५४।०१ [illegible] ॥ ॥ इति बुधसिंहशर्मणा विरचितायां स्वकृतग्रहणदर्पणग्रंथटीकायां प्रबोधि
न्यां स्पष्टाभासो द्वितीयः ॥ २ ॥ ॥ अथ चंद्रग्रहणाभासो व्याख्यायते तावच्छरसाधनं वृत्तेनाह पाताढ्यचंद्रदोर्ज्या
ग्नि घ्नी वेदै ४ र्हृता गुलादिशरः पाताढ्यचंद्रगोलादिग्ज्ञेयास्यो सरा तथा याम्या १ व्या० पाताढ्यचंद्रदोर्ज्या तात्कालिक
पातेनाढ्यस्य युतस्य चंद्रस्य भुजज्या ३ ग्नि ३ घ्नी त्रिगुणा कार्या सा वेदैश्चतुर्भिर्हृता भक्ता सती लब्धो गुलादिः शरः स्यात् पा
तयुतेंदुगोलतोऽस्य शरस्य दिग्दिशा ज्ञेया उत्तरदक्षिणगोलतः क्रमेणोत्तरयाम्या भवतीति उदाहरणं अत्र मध्यकालिके २९
।३७ इंदुः ०।७।३७।१९।३९ पातः ०।१।३।५४।०१ सपातेंदोः ६।११।१३।४० भुजांश ०।११।१३।४० ज्या २।१३।४० ज्या २।३४।४२ त्रिघ्नी
७।४४।०६ कृता प्राप्त सती जाता सपातेंदोर्दक्षिणगोलत्वात् तो याम्यो मध्यशरोंऽगुलाद्यः १।५६।०१॥ १॥ अथ चंद्रार्कबिंबभूभा
बिंबयोः साधनं ग्राह्यग्राहकज्ञानं परमविंशोपककथनं च वृत्तद्वयेनाह स्पष्टतराकलिका घा रजनीकरभुक्ति
रब्धि भस्माद्रि ७४ भक्ता प्रमिंदुबिंबं च द्वौ दो गतिः र गांग ६७ भक्ता प्र ॥ २ ॥ रविगतिः सप्तांशोनं भूभा बिंबांगुलादिकं
च न नेत्र भसा पिदधातीं दुं प्राशिनः ख युगा ४० विंशोपकाः परमाः ॥ २ ॥ व्या० स्पष्टतमाकला घा रजनीकरभुक्ते ६

सू	चं
११	४
२६	२०
४८	४६
५८	७
६ ०९	७६ ५५

सू	चं	पा
१०	४	·१
३७	३७	·३
२९	२९	५४
३९	३९	·१
६ ९	७६ ५५	३ २२

चंद्रगतिरर्कभुक्तिश्चतुःसप्तत्या ७४ भक्ता सत्या यल्लब्धमिंदुविंबमंगुलाद्यं । अथ चेंदोश्चंद्रस्य गतिश्च त्रिघ्नी त्रिगुणा कार्या सा
ऽगाग भक्ता सप्तषष्ट्या हृता सत्या यल्लब्धं रविगतिः सप्तांशोनं रविगतेः सप्तांशेनोनं हीनं सज्जातं भूभाविंबमंगुलाद्यं अथेंदुश्चंद्रं भूभा
पिदधाति आच्छादयति अतश्चंद्रग्रहणे च चंद्रविंबं छाद्यं भूछायाविंबं छादकं अथ च भूभाविंबमाकाशे यावद्दृश्यकक्षा तावदस्ति
अथ पराशिनश्चंद्रसंबंधिग्रहणस्य परमविशोपकाः खयुगाश्चत्वारिंशदेवातोधिका नेत्यर्थः उदाहरणं अत्रेंदुगतिः ७९६।५५
कृता द्वि ७४ भक्ता सती लब्धमिंदुविंबांगुलादि १०।४६।०८ अथेंदुगतिः ७९६।५५ त्रिघ्नी २३९०।४५ सप्तांग ६७ भक्ता सती लब्धं ३५।
१४०।१५८ रविगतेः ८०।१९ सप्तांशेनोन ८।३५।३४ हीनं कृतं सज्जातं भूछायाविंबमंगुलाद्यं ३१।०५।२४।।३।। अथ ग्रासप्रमाणं वृत्तेनाह छाद्य
छादकविंबैक्यार्धं शरवर्जितं भवेच्छन्नं तच्छाद्योनं सकलग्रहणे खच्छन्नसंज्ञकं प्रोक्तं ।।४।। छाद्यछादकविंबैक्यार्धं आद्य ग्राह
कविंबयोरैक्यस्यार्धं मानैक्यखंडं तदेव शरेण वर्जितं हीनं सच्छन्नं ग्राससंज्ञं भवेत् तच्चेच्छरेणोनं न भवति तदा ग्रहणाभावो ज्ञेयः
परमच्छन्नं विंशत्यंगुलासन्नमेतत्सर्वग्रहणे संभवति तद्ग्राससंज्ञं छाद्योनं ग्रासं विंबेनोनं हीनं सत्तत्सकलग्रहणे खच्छन्न
संज्ञकं खग्राससंज्ञकमुक्तं परमखच्छन्नमंगुलनवासन्नं उदाहरणं अत्र ग्राह्यं चंद्रविंबं १०।४६।०८ ग्राहकं भूभाविंबं ३१।०५।२४
उभयोरैक्यस्य ३१।५१।३२ अर्धं जातमंगुलाद्यं मानैक्यखंडं २०।५५।४६ यद्धि शराभावस्तर्हि परममानैक्यखंडमंगुलविंशत्यासन्नं
भविष्यत्येव । इदं मानैक्यखंडं शरेण ०।५६।०२ हीनं कृतं सज्जातोंगुलपूर्वको ग्रासः १९।५९।४५ अयमेवेंदुविंबेन १०।४६।०८ हीनः स
न्नजातः सकलेंदुग्रासस्तदुपरि खग्रासो ९।१३।३७ ।।५।। अथ विशोपकसाधनं वृत्तार्धेनाह स्थगितान्नखसंगुणितान्नाद्य
विलब्धं विशोपकादिफलं व्याख्या । नखसंगुणिता विंशतिभिर्गुणिता स्थगिता ग्रासाद्यच्छाद्यविलब्धं ग्रासाद्विंबेन लब्धं प्राप्तं तद्वि
शोपकादिफलं उदाहरणं ग्रासः १९।५९।४५ विंशति २० घ्न ३९९।५५।० चंद्रविंबेन १०।४६।०८ भक्तः सन्लब्धं विशोपकादि ३७।३२ अथ
मूलगणितसाधनं सार्धचतुर्भिर्वृत्तैराह राशिपदे कर्तव्ये तावन्मौहूर्त्तिको लिखेदंकान् ५ विषमसमविषमसम इति संज्ञामंता
कमावहेद्यावत् यावंतो विषमांकास्तावंतो मूलगणितलब्धांकाः ६ अंत्यादिविषमाद्वर्गं त्यक्त्वा द्विघ्नंपदं तु परविहृतं युग्मे विषमा

दृगंत्यत्क्वाप्तसद्धि २ संगुणं लब्धं ७ पंक्त्याद्यं पंक्तिहृते समेन्यविषमाद्विशोध्य तल्लब्धकृतिं पंक्त्यां लब्धं ७ द्विगुणं न्यसेदिति स्यान्मुहुर्दलं
मूलं ८ अंत्यास्तु मूलशेषात्सैकात्षष्ट्या ६० हतादवयवाद्यात् मूलेन द्विगुणे। न द्वि २ युतेनाप्तं समग्रफलमुक्तं ॥ ९॥ व्याख्या राशिं पदेशा
८ ऽमं लेकर्त्तव्यमो हृत्तिकोणाकस्त्वा वदाशवेकान् लिखेत् आद्यांकमारभ्यांत्यांकं यावदंकानामुपरि विषमसमविषमस म इति संज्ञाभा
वहेत्कंकयद्विहृयादेर्स्यधः तेष्वेंकेषु यावंतो विषमांका भवेयुस्तावंतो मूलगणितक्रमतो लब्धांका ज्ञेयाः ततोंत्याद्विषमादृगंत्यत्क्वा वर्गो
त्यादंकांकहृत्तुं द्विघ्नं द्विगुणितं सत्पदं मूलसंज्ञं ततो युग्मे समे पदविहृते मूलेन विहृते भक्ते सत्याप्तस्य लब्धस्य वर्गं विषमादन्यविष
मात्त्यक्त्वा लब्धं द्विसंगुणं पंक्त्याद्यं पूर्वगतमूलपंक्त्यंकाग्र आद्यं युतं कार्यं ततः समेऽन्यसमे पंक्तिहृते पूर्वागतपंक्त्यंकमित्यादि भक्ते स
ति लब्धं कृतिमाप्तस्य वर्गमन्यविषमाद्विशोध्य लब्धं द्विगुणं पंक्त्यां पूर्वागतपंक्त्यंकाग्रे न्यसेद्योजयेदित्येवं मुहुः पुनः पुनर्यावद्राशिः समाप्ये
त तावत्कुर्यात् ततः शेषाः पंक्त्या दलमर्द्धं मूलं स्यात् ततो मूलशेषात्सैकादेकसहितात्षष्ट्या हतात्षद्विगुणितादवयवाद्यात् ज्ञागरस्या
वयवांकेन युतात् द्विगुणितमूलेन द्वियुतेन यदाप्तं लब्धं तन्मूलस्य समग्रं फलं मूलाग्रफलमुक्तमिति उदाहरणं वक्ष्यमाणांक
राशौ ३५८ रूपरि विषमसमविषमसम इति संज्ञास्थापनेन विषमद्वयत्वात्प्रथमस्थाने मूलस्य लब्धांको द्वाविति सावयवमूलपद
राशौ ३५८। अ ।१६ मूलसाधनं यथा राशिः ३५८ तद्विषमत्रिकांका ३ देकस्य वर्ग एक एव १ त्यजेत् वर्गात्यादकः एको १ द्विगुणो मूलसंज्ञः २
पंक्तिसंज्ञश्चोक्तः ततः शेषात् २५८ समे पंचमे ५ मूलभक्ते सति लब्धानां नवानां ९ वर्ग एकाशीतिः ८१ शेषस्या ७७ त्याविषमाद्वि
त्रूपान्नवत सतो लब्धा अष्ट ८ द्वि २ गुणाः संतः १६ पंक्त्यो २ योजिता जाता पंक्तिः १८ पंक्तेर्दलमर्द्धं मूलं १९ ॥ शेषा १७ दष्टानां वर्गे ६४ पा ८
तितेसति शेषो मूलशेषः ३० मूलावयवार्थं शेषं ३० सैकं ३१ षष्टि ६० गुणं १८६० राशयगावयवेन ३५ युतं १८९५ एभ्यो मूलेन १९ द्विगुणेन
३८ द्वियुतेन ४० यदाप्तं तन्मूलाग्रं ४७ शेषं ३२ सैकं ३३ षष्टि ६० घ्नं २००० अग्रावयवेन ८ आद्यं २००८ भाजकेन ४० भक्ते सति लब्धं मूल
स्य तृतीयस्थानजं फलं ५२ एवं जातं मूलं १९।४७।५२॥ अथ सूक्ष्ममूलार्थं राशेरंकान् षष्ट्या ६० सावर्ण्य विषमसमादिसंज्ञां चक्र
त्वा मूलोत्पादनरीत्या जातं सूक्ष्ममूलं १८।४९।४९। अथ स्थितिमर्दनियनं सार्द्धवृत्तेनाह द्वि २ घ्नराशांशांसयुता हृता तदंस्वाद्य

कु१८० घ्नमर्केंद्वोः गत्यंतरेणाप्तं लब्धा घटिकादिका स्थितिर्मध्या १० एवं स्थितिवन्मर्दो घट्याद्यो भवति तदनु खस्पर्शिता त्र्या०
ह्नि शरात् द्विगुणित बाणात् ग्रासयुता हता ग्रासेन युता पुनर्ग्रासेनैव गुणिता घन लब्धं पदं मूलं तत्खाष्टकु घ्नं मध्या त्यधिकशतेन गु
णितं अर्केंद्वोः सूर्यचंद्रयोर्गत्यंतरेण भक्तं सज्ञलब्धा घट्यादिका मध्यस्थिति तदनु पश्चात् खस्पर्शिता खग्रा खग्रासात् स्थितिवत्
घट्याद्यो मध्यमर्दो एवमेव भवतीत्यर्थः उदाहरणं शरः १।५६।१२ द्विगुणः ३।५२।२ ग्रास १६।५८।४५ युतः २०।५१।४७ पुनर्ग्रास १६।५८।
४५ गुण ३५४।३५।६ अस्य सवर्णितं तस्य मूलं १८।४८।४९ खाष्टकु १८० घ्नं ३२८८।३७ सावर्णितं २०३२६।९ सवर्णित रवींदुगत्यंतरेण ४४२।६
भक्तं सज्ञलब्धा मध्यास्थिति घट्याद्या ४।३६।१२ ॥ परमास्थितिः पंचघटिका सन्ना ॥ अथ शरः २।५६।१२ द्विघ्न ३।५२।२ खग्रास १६।२
।३७ युतः २०।५।३९ पुनः खग्रास १६।२।३७ गुणः ६२।५१।२७ मूलं १५।५४।४१ खाष्टकु १८० घ्नं २८६७।१२ सवर्णितं १५६९२ सवर्णितरवींदुग
त्यंतरेण ४४२।६ भक्तं सज्ञलब्धो मध्यमर्दो घट्यादि २।५६।१२ परममर्दो घटिका द्वयासन्नः। अथ स्पार्शिकमौक्तिकस्थितिमर्दयो रा
नयनं स्पर्शमोक्षकालं संमीलनोन्मीलनकालं च साईवृत्तद्वयेनाह द्विघ्ना स्थितिरिषुघ्ना लब्धं यो ४८ नाद्या विवर्जिता क्रमशः ११
स्पार्शिकमौक्तिकसंज्ञे स्थिती स्त ओजे पदे सपातविधौ चेत् समपदेन्यथैवं स्थितिवन्मर्दौ क्रमात् तु पर्वांते १२ स्थितिमर्दाभ्यां र
हिते स्पार्शिकसंमीलने निजाभ्यां स्तः तस्मिन् युक्ते मोक्षोन्मीलनकालौ स्फुटौ भवेतां तो १३ व्याख्या० चेद्यदि सपातविधौ मध्यका
लिकपातयुतेंदो ओजे पदे विषमपदस्थे सति तदा मध्यास्थितिर्द्विष्ठा द्विधा स्थाप्या एकत्र इषुघ्ना लब्धं शरेन मध्यशरस्याष्टचत्वारिंशद्भा
गेनाद्या युता परत्र वर्जिता हीना सती क्रमशः स्पार्शिकमौक्तिकसंज्ञे स्थिती स्तो भवतः इति चेत् सपात चंद्रे समपदस्थे सति तदान्य
था कार्या धनर्णे वैपरीत्ये युता मोक्षस्थितिर्हीना सती स्पर्शस्थितिर्ज्ञेया एवं स्थितिवन्मर्दौ स्पर्शमोक्षमर्दौ साध्यौ अथ निजाभ्यां स्वी
याभ्यां स्थितिमर्दाभ्यां स्पर्शस्थितिस्पर्शमर्दाभ्यां पर्वांते मध्यकाले रहिते हीने सति क्रमात् स्पार्शिकसंमीलनकालौ स्तो यदि मोक्षस्थि
तिमोक्षमर्दाभ्यां पर्वांतो युतस्तदा तौ द्वौ मोक्षोन्मीलनकालौ स्फुटौ स्पष्टौ भवेतामिति उदाहरणं० मध्यशरः २।५६।१२ नागयुगै ४८ र्भ
क्तो लब्धेन ०।३।४५ सपातेंदो विषमपदत्वात् मध्यस्थितिः ४।३६।१२ युता सती जाता स्पष्टा स्पर्शस्थिति घट्याद्या ४।२८।२६ फलेन ०।२।२५

हीनासतीजातास्फुटग्रासोऽस्थितिः ४।२२।२६ रविगतफलेन ०।२।२५ स्थितिवन्मध्यमर्द्धं १।५६।२२ युतो जातो घ्राद्यः स्पर्शमर्दः १।५८।३७ फले
न ०।२।२५ हीनो जातो मोक्षमर्दः १।५३।४७ अत्र पर्वान्तो मध्यकालो ग्रासादिः २९।३७।२ स्पर्शस्पर्शस्थित्या ४।२८।२६ हीनः सन् जातो मोक्षकालः ३४
१ ।२०।२८ एवं पर्वान्तः २९।३७।२ स्पर्शमर्देन १।५८।३७ हीनो जातः संमीलनकालः २७।३८।२५ मोक्षमर्देन १।५३।४७ पर्वान्तः २९।३७।२ युतो जा
९ तउन्मीलनः ३१।३०।४९ स्पर्शविनापनाट्र मोक्षयोः ३०।२०।२८ रं तरे ग्रहणकालः ५।१२।२ अत्र खग्रासवशाद् ग्रहणस्पर्शकालिकोद्ग्रा
हरणमायातं खग्रासाभावे स्पर्शमध्यमोक्षात्मकं त्रिकालिकोदाहरणं साध्यमिति २२ अथ स्पर्शमोक्षयोः शरयोरानयनं वृत्तेनाह
स्थित्यन्त्यंशोनयुते मध्यमशरे ओजपदस्थमुद्गते स्पार्शिकमौक्तिकवाणौ समपदजाते तु तोन्यथा व्यक्ते २४ व्या० ओजपदस्थमुद्गते
सपातचन्द्रस्य विषमपदोत्पन्ने सति मध्ये मशरे स्थित्यन्त्यंशोनयुतो मध्यस्थित्यास्तृतीयांशेन क्रमेणोनेयुते च कृते सति स्पार्शिकमौ
क्तिकवाणौ स्पष्टौ स्तः समपदजाते सति ततस्तत्संस्काराद्न्यथा कृते मध्यशरमध्ये स्थितितृतीयांशो धनर्णैः कृते सति स्फुटेषू स्याता
मित्यर्थः उदाहरणं अत्र सपातचन्द्रो विषमपदस्यस्तेन मध्यस्थितेः ४।२६।१ तृतीयांशेन १।३२।० मध्यशरो १।५६।२ हीनो जातः स्पर्श
शरो गुणाद्यः ०।२४।१।१ अंशेन १।३२।० मध्यशरो १।५६।२ युतो मोक्षशरः ३।२८।१।२॥ ।अथ च स्पर्शमोक्षस्थित्योः स्पर्शमोक्ष सम
र्द्योः स्पर्शमोक्षशरयोश्च संस्कारस्तु मयाह् संप्रदायानुसारतो राहुतो वस्तुतस्तु स्पर्शमोक्षकालिकसपातचन्द्रादयास कृतकर्मणा
शरस्थित्यादिकमस्मात्कं सम्यक् प्रतिभाति यतो मध्यशराशराः प्राप्तः कदाचित्स्पर्शमोक्षशरान्यापि भविष्यत्येवा [illegible] तः स्पर्शमोक्षस्थितिम श्री
र्द्दशरार्थमुदाहरणं यथा पर्वान्तः २९।३७ मध्यस्थित्या हीनो ४।२६ जातः स्थूलः स्पर्शकालः २५।१६ तात्कालिकमर्कः ३।२६।१८।२२ पातः १
२।५३।४७ सपातः ६।०।१२।२० भुजांशाः ०।१२।२० ज्या ०।२५।५४ त्रिरश्मी १।७।४७ कृता ४ ग्रासतीजातः स्पर्शशरो याम्य ०।१९।२५ चन्द्रविंबं ०।०
४६।४८ मानैक्यखण्डं १८।५५।४६ शरेण ०।१९।२५ हीनो जातो ग्रासः १८।३६।२१ चन्द्रबिंबेन ०।४६।८ हीनो जातः खग्रासः ७।५०।१३ शरः
०।१९।२५ द्विघ्नः ०।३८।५० ग्रासा १८।३६।२१ युतः १९।१५।११ ग्रासः १८।३६।२१ गुणः ३५८।२३।१९ मूलं १८।५५।२६ खाब्दे [illegible] १०० घ्नं ३४०६ ९
१७८ सावर्ण्यर्कः ४४०८ सवर्णितरवीन्दुग संतरेण ४४२० हमक्तं लब्धा स्थितिः ४।३७ द्विघ्नशरः ०।३८।५० खग्रासा ७।५०।१३ युतः ८।२९।२
१७८ सावर्ण्यर्कः ४४०८ सवर्णितरवीन्दुग संतरेण ४४२० हमक्तं जातो मर्दः १।५८।३५
खग्रासा ७।५०।१३ गुणः ६६।२९।२२ मूलं ८।९।१४ खाब्दे दुघ्नं २४६३।४२ सावर्ण्य ८८० हरभाजकेन ४४२० हमक्तं जातो मर्दः १।५८।३५

वंति: २९।३७ स्थिति: ७।३७ हीन: २५।० एतत्कालिकश्चंद्र: ७।२६।१८।२० पात ११।३।५२।३७ सपात: ६।०।१२।०७ भुजांशा ज्या ०।२५।२६ त्रिज्
भा १।२६।१८ कृता ४ ग्रा जात: स्पार्शिकि: शरो याम्य: ०।१९।४ विंबं २०।४६।१८ खंडं २८।५५।४६ शरोनं ग्रास: १८।२६।४२ विंबहीन: खग्रास:
७।५०।२४ द्विघ्नशर: ०।२८।८ ग्रासयुत: १९।२४।५० ग्रासगुण: २५८।१२।२२ मूलं १८।५५।२६ खाष्टेंदुघ्नं २४०६।४८ सावर्ण्यं २०४४० भा
जकेन भक्तं जाता स्थिरा स्पार्शिकी स्थिति: ४।३७ द्विघ्नशर: ०।२८।०८ खग्रासयुत: ८।२८।४२ खग्रासगुण: ६६।२९।३७ मूलं ८।१९।१५
खाष्टेंदुघ्नं १४६७।४५ साव[illegible]र्ण्यं ८८०६५ भाजकेन भक्तं जात: स्थिर: स्पार्शमर्द: १।५९।३ अथ पर्ववंति: २९।३७ मध्यास्थित्या ७।२६ युतो
जात: स्पष्टो मोक्षकाल: ३४।२३ एतत्कालिक इंदु: ४।२८।२०।४५ पात: ११।२।५४।२५ सपात: ६।१।१५।१० भुजांशा २।१५।१० ज्या ७।४३।२०
त्रिज्या भा १४।२०।२० कृता ग्रासतो जातो मोक्षशरो याम्य: ३।३२।३७ खंडं १८।५५।४६ शरोनं ग्रास: १५।२२।०९ विंबहीन: खग्रास: ७।३७
०१ द्विघ्नशर: ७।५।१४ ग्रासयुत: २२।२८।२२ ग्रासगुण: २४५।४६।० मूलं १८।३५।५२ खाष्टेंदुघ्नं ३२४७।२३ सावर्ण्यं २००८२३ भाजके
न भक्तं स्थिति: ४।३२ द्विघ्नशर: ७।५।१४ खग्रासयुत: १९।४२।२५ खग्रासगुण: ५४।०।२।१४ मूलं ७।२१।१८ खाष्टेंदु १२८० घ्नं १२९२।१२ साव
र्ण्यं ७९३।२२ भाजकेन भक्तं मर्द: १।३७।४६ पर्ववंति: २९।३७ स्थिति: ४।३२ युत: ३४।९ एतत्कालिक इंदु: ४।२८।२९।५२ पात: ११।२।५४।२५
सपात: ६।१।२४।१७ भुजज्या ७।४१।२८ त्रिज्याभा १४।४।५४ कृता ग्रासतो जातो मौक्षिक: स्पष्टशरो याम्य: ३।२१।१२ खंडं शरोनं ग्रास: १५।
२४।३२ विंबहीन: खग्रास: ७।२८।२५ द्विघ्नशर: ७।२।२६ ग्रासयुत: २२।२६।५९ ग्रासगुण: ३४५।५५।५२ मूलं १८।३५।५७ खाष्टेंदु
घ्नं ३२४७।५१ सावर्ण्यं २००८७ भाजकेन भक्तं जाता मौक्षिकी स्थिरा स्पष्टा स्थिति: ४।२२ द्विघ्नशर: ७।२।२६ खग्रासयुत: ११।४०
५१ खग्रासगुण: ५४।१२।५ मूलं ७।२१।४४ खाष्टेंदुघ्नं १२२५।१२ सावर्ण्यं ७९५।२२ भाजकेन भक्तं जातो मौक्षिक: स्थिरो मर्द: १।४७।
५५ अ[illegible]त्र तिथ्यंतो ग्रहणमध्यकाल: २९।३७ स्पर्शस्थित्या ४।३७ हीनो जात: स्पर्शकाल: २५।०॥ पर्ववंति: २९।३७ स्पर्शमर्देन १।५९।३१
हीनो जात: संमीलनकाल: २७।३७।३९ स्पर्शमांत: २९।३७ मोक्षस्थित्या ४।३२ युतो जातो मोक्षकाल: ३४।९ तिथ्यंत: २९।३७ मोक्षमर्देन
१।४७।५५ युतो जात उन्मीलनकाल: ३१।२४।५५ स्पर्शकाल: २५।०० मोक्षकाल: ३४।९ योरंतरे कृते सति जातो ग्रहणकाल: ९।९ अत्र
स्पर्शशरो याम्य: ०।१९।४ मोक्षशरो याम्य: ३।३२।३७। इति बुधसिंहशर्मणा रचितायां स्वकृतग्रहणदर्शिकायां प्रबोधिन्यां चंद्रग्रहण

मासस्तृतीयः ३ अथ सूर्यग्रहणमासोदाख्यायते तत्रादौ परिपाटी॰ शाके १६९८ लौकिकचैत्रमा ३० भौमवासरे घट्याद्या स्थूला
९।२८ तत्रपर्वविलोकनार्थं ग्रंथगताब्दाः ८ अधिमासाः ४ अपतितक्षयोकाः १ कार्याः ३ अवमादि ५२ उदये हर्गण ३२७ मध्यमरवी
१० ११।२०।३७।४१ इंदू ११।७।२३।० उच्चं ०।१५।२६।२० पाताः ६।०।९।३९।३५ रवेरब्दबीजं कलाद्यं ०।७ ऋणं चंद्रस्य विकलारूपं ० ऋणं उच्चस्य विक
10 लात्मकं ० धनं पातस्य विकलारूपं ० धनं रवेर्देशांतरं विकलात्मकं ४४ चंद्रस्य विकलारूपं ५९३ उच्चस्य विकलात्मकं ५ पातस्य विकला
रूपं २ देशांतरं धनं देशांतराब्दबीजसंस्कृता मध्यमा रवी ११।२०।२८।१८ इंदू ११।७।२०।५९ उच्चं ०।१५।२६।२५ पाताः ६।०।९।३५।३७ रवेर्मंदफ
लमंशादि २।९।२५ धनं चंद्रस्य २।७।५२ धनं भौमांशं ०।४।५७ धनं अयनांशाद्याः २०।५०।२ रवेरुदयांतरं विकलात्मकं १ चंद्रस्य क
लाद्यं ०।१५ ऋणं रवेर्भुजांतरं विकलात्मकं ७ विधोर्विकलारूपं ९८ पातस्य विकलारूपं ० चरमृणं भौमांश फलमंदफलोदयांतरचर
कर्मस्फुटाः स्पष्टा रवी ११।२२।३७।२५ इंदु ११।१०।२८।५५ पाताः ६।९।२५।३७ रवेर्गतिफलं कलाद्यं ०।१२ धनं चंद्रस्य कलाद्यं ५५।१५ ऋणं
